अण्डजा उद्भिदश्च"। उद्भिद्यते पृष्पफलमनेन इति निरुक्तेः यागभेदः ॥)

उद्भिदं, त्रि, ( उद्भिनत्तीति। उत्+भिद्+इगुप धेति कः।) तरुगुल्मादि। तत्पर्य्यायः। उद्भित् २ उद्भिज्जम् ३। इत्यमरः॥ उद्भिज्जम् ४। इति रमानाथः॥ (यथा महाभारते १४ पर्व्वणि।
"जरायुजाण्डजातानि स्वेदजान्युद्भिदानि च" ॥)

उद्भिदं, क्ली, ( उद्भिनत्तीति। उत्+भिद्+क।) पांशुलवणम्। इति रत्नमाला॥ पाङ्गा लुण इति भाषा। ("उद्भिदानि पलालेत्कुरीषवेणुच्छिति-जानि"। इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशत्तमेऽध्याये॥)

उद्भूतः,त्रि, (उद्भवति स्म। उत्+भू+क्त।) उत्पन्नः। जातः। यथा। ईशानसंहितायाम्।
"माघे कृष्णचतुर्द्दश्यामादिदेवो महानिशि।
शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः" ॥
इति तिथ्यादितत्त्वम्॥ (यथा, भाषापरिच्छेदे ५६।
"उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः"।)

उद्भूतरूपं, क्ली, (उद्भूतं प्रत्यक्षयोग्यं रूपम्।) नयनगोचररूपम्। यथा,—भाषापरिच्छेदे॥।
"उद्भूतरूपं नयनस्य गोचरं
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥५४॥
क्रियाजातौ योग्यवृत्ती समवायञ्च तादृशम्।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः"॥५५॥

उद्भ्रमः, पुं, (उद्भ्रमणमिति। उत्+भ्रम+घञ्। नोदात्तोपदेशेति न वृद्धिः।) उद्वेगः। इत्यमरः॥

उद्भ्रान्तं,क्ली, (उत्+भ्रम+क्त।) बाहुमुद्यम्य मण्डलाकारखड्गभ्रामणम्। इति महाभारतम्॥ (परिभ्रान्ते, त्रि। यथा, रघौ ४। ४६॥
"मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः" ॥
विकले। विक्लवे। यथा, रामायणे,—
"उद्भ्रान्तहृदयश्चापि विवर्णवदनोऽभवत्" ॥)

उद्यः,पुं, नदः। इति हेमचन्द्रः॥ (उद्यते यत्। वद+क्यप्। कथनीये, त्रि। यथा, स्पष्टोद्यम् वाक्यम्।)

उद्यतं,त्रि, (उत्+यम+क्त।) उत्तोल्यधृतवस्त्रादि। उद्यतशस्त्रादि। तत्पर्य्यायः। उद्गूर्णः२॥ इत्यमरः॥ (यथा, रघुवंशे। ४। १६।
"प्रजार्थसाधने तौ हि पर्य्यायोद्यतकार्म्मुकौ" ॥)

उद्यतः, पुं, (उत्+यम+क्त।) ग्रन्थपरिच्छेदः। इति जटाधरः॥

उद्यमः, पुं, (उत्+यम+घञ्। संज्ञापूर्व्वकत्वात् वृद्ध्यभावः।) उद्योगः। तत्पर्य्यायः। गुरणम् २। इत्यमरः॥ गूरणम् ३ गोरणम् ४। इति तट्टीका॥ उत्साहः ५ अध्यवसायः ६ उद्योगः ७। इति जटाधरः॥ (यथा, कुमारे ५। ३।
("निशम्य चैनां तपसे कृतोद्यमाम्"।
"शशाक मेना न नियन्तुमुद्यमात्"।
इति च कुमारे ५।५।)

उद्यानं, क्ली, (उद्यान्ति क्रीडार्थमस्मिन्। उत्+या+ल्युट्।) राज्ञः साधारणं वनम्। तत्पर्य्यायः।

आक्रीडः २।
("बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्म्या"। इति मेघदूते ७।)निःसरणम्। प्रयोजनम्। इत्यमरः॥

उद्यानपालः, त्रि, (उद्यानं पालयतीति। उद्यान+पालि+अण्।) उद्यानरक्षकः। माली इति भाषा॥
("उद्यानपालसामान्यमृतवस्तमुपासते" ॥
इति कुमारे।२।३६॥)

उद्युक्तः, त्रि, (उत्+युज्+क्त।) उद्यमयुक्तः। उद्योगविशिष्टः। इत्यमरटीकायां भरतः॥ (यथा, अमरकोषः। "इष्टार्थोद्युक्तउत्सुकः"।)

उद्योगः, पुं, (उत्+युज+घञ्।) यत्नः। चेष्टा। तत्पर्य्यायः। उत्साहः २ अध्यवसायः ३ उद्यमः ४। इति जटाधरः॥ (यथा, मार्कण्डेये ८८।२।
"उद्योगः सर्व्वसैन्यानां दैत्यानामादिदेश ह"।
"उद्योगादनिवृत्तस्य सुसहायस्य धीमतः"।
छायेवानुगता तस्य नित्यं श्रीः सहचारिणी" ॥
इति नीतिवाक्यम्।
महाभारतस्य उद्योगपर्व्व। यथा, महाभारते १।१।६३।
"उद्योगः सैन्यनिर्य्याणं श्वेतोपाख्यानमेवच" ॥)

उद्योगी, [न्] त्रि, (उद्योगोऽस्यास्तीति। उद्योग+इन्।) उद्योगविशिष्टः। उद्यमी। तथा च।
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः" ॥
इति नीतिसारे १३॥

उद्योतः, पुं, (उत्+द्युत+घञ्) आलोकः। ज्योतिः। इति हलायुधः॥

उद्रः, पुं, (उनत्तीति। उन्द+रक्।) जलजन्तुविशेषः। इत्यमरः॥ उद्‌विड़ाल इति भाषा।

उद्रङ्गः,पुं, पुरविशेषः। "व्योमचारि पुरं शौभमुद्रङ्गः प्रतिमार्गकः"। इति जटाधरः॥

उद्रङ्कः, पुं, व्योमचारि पुरम्। तत्पर्य्यायः। खपुरं २ ऊर्द्ध्वगं पुरं ३ हरिश्चन्द्रपुरं ४ शौभं ५ प्रतिमार्गकः ६ चङ्गा ७ चक्रः ८। इति त्रिकाण्डशेषः॥

उद्रथः, पुं, (उद्गतो रथो यस्मात्।) रथकीलम्। ताम्रचूड़पक्षी। इति मेदिनी॥

उद्रिक्तं, त्रि, (उद्रिच्यते स्म। उत्+रिच+क्त।) स्फुटम्। स्पष्टम्। इति जटाधरः॥

उद्रेकः, पुं, (उत्+रिच+घञ्।) उपक्रमः। वृद्धिः॥
"अधुनैव कुरङ्गाक्षि जहार जगतां मनः।
न जाने यौवनोद्रेके जीवनस्यापि का गतिः" ॥
इत्युद्भटः॥
"हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम्।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्त्ति जगताम्" ॥
इति महिम्नःस्तोत्रम्॥
("तमःप्रवेशः संरम्भो दोषोद्रेकहतस्मृतेः"।
इति वैद्यकरविनिश्चयेऽपस्माराधिकारे॥)

उद्रेका, स्त्री, ( उद्रेक+टाप्।) महानिम्बः। इति राजनिर्घण्टः॥

उद्वत्सरः, पुं, (उत्क्रान्तो वत्सरः।) वत्सरः। इति हेमचन्द्रः॥

उद्बन्धनं, क्ली, ( उत्+बन्ध+ल्युट्) ऊर्द्ध्वबन्धनम्। इति स्मृतिः॥ गलाय दड़ि दिया फाँसी दिया टाङ्गान इत्यादि भाषा॥

उद्वमनं, क्ली, (उत्+वम+ल्युट्।) उद्गीरणम्। तुलिया फेलन वाँति करण इत्यादि भाषा॥

उद्वर्त्तः, त्रि, (उत्+वृत्+घञ्।) अतिरिक्तः। उवरण वाड़ा इत्यादि भाषा। यथा। "उद्वर्त्तो हि ग्रन्थः समधिकफलमावहे"। इति व्याकरणटीका॥

उद्वर्त्तनं, क्ली, (उत्+वृत्+णिच्+भावे करणे वा ल्युट्।) उत्पतनम्। ( यथा, मेघदूते ४२।
मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि"।)
विलेपनम्। घर्षणम्। इति मेदिनी॥
(यथा, मनुः ४। १३२।
"उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च।
श्लेष्मनिष्ठ्यूतवान्तानि नाधितिष्ठेत्तु कामतः" ॥)
शरीरनिर्म्मलीकरणगन्धद्रव्यादि। तत्पर्य्यायः। उत्सादनम् २। इत्यमरः॥ हरिद्रा सेवन आवटन इत्यादि भाषा। सामान्योद्वर्त्तनगुणाः। कफवायुभेदोहरातरोगनाशित्वम्। अङ्गस्थैर्य्यं चर्म्मनिर्म्मलकारित्वञ्च॥ हरिद्राद्युद्वर्त्तनगुणाः। कण्डूवैवर्ण्यरूक्षताहारित्वम्॥ तिलोद्वर्त्तनगुणाः। कण्डूरूक्षतात्वग्दोषनाशित्वम्। इति राजवल्लभः॥
("उद्वर्त्तनं वातहरं कफमेदोविलापनम्।
स्थिरीकरणमङ्गानां त्वक्प्रसादकरं परम्॥
शिरामुखविविक्तत्वं त्वक्स्थस्याग्नेश्च तेजनम्॥
इति चिकित्सितस्थाने २४। अध्याये सुश्रुतेनोक्तम्॥)

उद्वर्द्धनं, क्ली, (उत्+वृध्+ल्युट्।) अन्तर्हासः। इति त्रिकाण्डशेषः॥

उद्वर्हितः, त्रि, ( उत्+वर्ह+क्त।) उद्धृतः। इति भूरिप्रयोगः॥ उद्वाहितो वा इति पाठः॥

उद्वहः, पुं, (उदूर्द्ध्वं वहति प्रापयतीति। उत्+वह+अच्।) पुत्रः। इति हेमचन्द्रः॥ (यथा,—रघुः।६।६।
("उदयमस्तमयञ्च रघूद्वहात्"॥)
सप्तवाय्वन्तर्गतवायुविशेषः। स तु प्रवहवायोरूर्द्ध्वस्थितः। इति सिद्धान्तशिरोमणिः॥
("आवहः प्रवहश्चैव विवहश्च समीरणः।
परावहः संवहश्च उद्वहश्च महाबलः॥
तथा परिवहः श्रीमानुत्पातभयशंसिनः।
इत्येते क्षुभिताः सप्त मारुता गगनेचराः" ॥
इति हरिवंशे। २३६ अध्याये। विवाहः॥)

उद्वहा, स्त्री, ( उद्वह+टाप्।) कन्या। पुत्री। इति हेमचन्द्रः॥

उद्वानः, त्रि, ( उत्+वन+घञ्।) उद्वमितः। उद्वान्तः। इत्यमरटीकायां रायमुकुटः॥

उद्वान्तं, त्रि, (उत्+वम्+क्त।) वमितवस्तु। तत्-